National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 68-70
© 2026 NJHSR
www.sanskritarticle.com

**मनामी वैराग्य**
शोधच्छात्रा (PhD),
राष्ट्रीयसंस्कृतविश्वविद्यालय,
तिरुपतिः

**Correspondence:**
**मनामी वैराग्य**
शोधच्छात्रा (PhD),
राष्ट्रीयसंस्कृतविश्वविद्यालय,
तिरुपतिः

# कालीपदतर्काचार्यविरचितमन्दाक्रान्तावृत्तखण्डकाव्ये गुणसन्निवेशनविधिः

**मनामी वैराग्य**

**शोधसारांशः -**

पृथिवीसृष्टिकालतः शुभफलप्रदायकसर्वाणि कर्माणि गुणनाम्ना परिचीयन्ते। अस्माकं लोकव्यवहारे अपि गुणप्रयोगम् अत्यावश्यकीयम् । सर्व कर्म सुखेन सम्पद्यते। दुःखेन किमपि कार्यं न सम्पद्यते। अतः सुखमयलोकव्यवहारं सर्वदा प्रयोजनम्। श्रुतिमधुरशब्दश्रवणेन सुदूरप्रसारिसुखकरं फलं लभ्यते। ज्ञानमूलकवाक्यश्रवणेन ज्ञानं लभ्यते, यत् ज्ञानं समाजविभिन्नक्षेत्रेषु सुदूरप्रसारिफलप्रदायकम्। मानवानां परस्परवाक्यालापः यदि श्रुतिमधुरशब्दप्रयोगैः भवति तर्हि तेषां मनांसि आनन्दप्लुतानि भवन्ति। संस्कृतवाङ्मये विभिन्नक्षेत्रे गुणप्रयोगं, गुणस्य प्रभावं पूर्वकालतः इदानीम् अपि लभ्यते। अस्माभिः यदि सम्यक्तया द्रष्टुं शक्यते तर्हि परिशील्यन्ते संस्कृतशुभाषितानि। वेदः, व्यकरणम्, दर्शनम्, साहित्यम्, शिलालेखः, पुराणम् इत्यादिषु विभिन्नक्षेत्रेषु गुणशब्दप्रयोगं तस्य यथार्थव्यवहारपद्धतिः अस्ति। यः अस्माकं जगत्संसारं शिवसङ्कल्पं कर्तुं सचेष्टः भवति। विविधविषयान् मनसि निधाय एतस्मिन् आधुनिकखण्डकाव्ये गुणसन्निवेष्टुं कामोऽहम्।

**प्रस्तावना** -

गुणः पुं। मोर्वी ज्या शिञ्जिनी गुणः। काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते । परन्तु कः गुणः, केवलं काव्यस्य गुणः वर्तते, न गुणः सर्वेषु स्थास्यते। अस्माकं जगत्संसारः गुणदोषाभ्यां द्रवीभूयते। आत्मस्वरूपब्रह्म जीवदेहे प्राणसञ्चारे केन्द्रीभूतम् इति आत्मनः गुणः। आत्मा देहं परित्यज्य बहिरभिमुखं यदा गच्छति तदा देहः मृतः इति उद्घोषितः भवति। तदा आत्मणः गुणः नष्टः। ब्रह्मसृष्टिः सुन्दरी प्रकृतिरियम्। इयं वसुन्धरा मनोरमा। पादपाः प्राणिकूलानां कृते प्राणवायुन् (अक्सिजेन) प्रयच्छन्ति इति पादपानां गुणाः। यदा झञ्झावातेन प्राणिकूलः विपर्यस्तः तदा प्रकृतिरुष्टा इति श्रुतिपथम् आयाति न गुणाः श्रूयन्ते। गगनचुम्बित-असीमसमुद्रजलसौन्दर्यदर्शनोत्सुकाः सदा गच्छन्ति समुद्रदर्शनाभिमुखम् इति समुद्रस्य गुणः उच्यते। परन्तु उत्थितजलराशीनां गुणः नास्ति भयावहता अस्ति। आकाशात् वृष्टिः पतति इति मनोमुग्धकरः परन्तु अतिवृष्टिकारणेन चतुर्दिशः प्लाविताः इति गुणाः न सन्ति। अस्माकं जगति समान्तरालभावेन गुणदोषाः संगम्यन्ते। विद्याक्षेत्रेषु विभिन्नशाखासु तस्य प्रभावं दरीदृश्यते। यथा- भूगोल-इतिहास-विज्ञान-सर्वक्षेत्रेषु गुणदोषप्रभावः लक्षणीयः। विज्ञानक्षेत्रेषु युगान्तकारी आविष्कारः पारमानविकवोमा इति पर्वतसमतलकरणाय व्यवहृयते इति गुणः। परन्तु देशध्वंसनार्थं तस्य व्यवहारः

दोषः। अद्यतनयुगे अतीव प्रचलितदूरवाणी योगायोगमाध्यमरूपेण सर्वत्र व्यवहृयते तस्य उपयोगितागुणः जनानां कृते। परन्तु तस्य अपव्यवहारः दोषः इति कथ्यते। अस्माकं संस्कृतकाव्यशास्त्रे गुणशब्दस्य प्रयोगः प्रचलितः आदितः इदानीम् अपि।

**संस्कृतकाव्यशास्त्रीयगुणनिरूपणम्-**

संस्कृतकाव्यशास्त्रे शब्दार्थ-अलंकार-रीति-रस-ध्वनि-औचित्य-गुण-दोषाः आद्रियन्ते। गुणः स्वीयवलेन वलीयान्। काव्यशास्त्रे बीजरूपेन गुणस्य स्थानं वर्तते काव्यस्य अपराङ्गत्वेन च आद्रियते रसालंकारादिषु अपि गुणस्य भूमिका वर्तते। काव्यस्य अपराङ्गत्वेन आद्रियते रसालंकारादिषु अपि गुणस्य स्थानं वर्तते। काव्यस्य अपराङ्गत्वेन आद्रियते रसालंकारादिषु अपि गुणस्य भूमिका वर्तते। रस-अलंकार-रीति-ध्वनि-औचित्यादिषु गुणः सर्वोत्कृष्टः। गुणाभावे काव्योत्कृष्टत्वं न लभ्यते। गुणविषये साहित्यशास्त्रेषु अपि आचार्यैः मतान्तराणि परिवेशितानि सन्निवेशितानि च। साहित्यशास्त्रस्य पराम्पराक्रमेण प्रवर्तकाचार्यैः स्वग्रन्थेषु गुणविषयः प्रतिपादितः।

भरतमुनिमते गुणाः- दीपानां विपर्यये गुणाः भवन्ति इति भरतेन गुणलक्षणं प्रतिपादितम्।

भामहमते गुणाः- भामहमते गुणत्रयरससमन्विताः।

दण्डिमते गुणाः श्लेष-प्रसाद-समता-माधुर्य-सुकुमारता-अर्थव्यक्ति-रुदारत्वमोज-कान्ति-समाधयः।।

वामनमते गुणस्वरूपम्- राजशेखरस्य काव्यमीमांसा इति काव्यतात्तिकग्रन्थस्य पदवाक्यविवेकस्य चतुर्थोऽध्याये गुणविषयिनी धारणा अस्ति।

भोजदेवमते गुणधारणा - भोजदेवेन शब्दार्थयोर्वर्गद्वयातिरिक्तं वैशेषिकगुणवर्गस्य स्थापना कृता।

क्षेमेन्द्रस्य गुणधारणा-कविकण्ठाभरणे संक्षिप्तरूपेन गुणानां निरूपणं लभ्यते ।

मम्मटमते गुणस्वरूपम्-आचार्यमम्मटेन प्रधानतया गुणानां रसधर्मत्वमभिहितं काव्यलक्षणे।

आचार्यवाग्भटस्य गुणधारणा - वाग्भटेन दशगुणधारणा निरूपिता।

आचार्यविद्याधरस्य मते गुणाः - विद्याधरेण गुणसामान्यलक्षणे आत्मनि शौर्यादयः इव गुणानां रसधर्मत्वं स्वीकृतम्।

आचार्यविश्वनाथस्य मते गुणस्वरूपम् - मम्मटस्य आत्मनः शौर्यादयः गुणधर्माः अचलस्थितयः, उत्कर्षहेतवो गुणाः प्रतिपादिताः।

पण्डितराजजगन्नाथस्य रसगंगाधरे गुणलक्षणस्य अभावः दरीदृश्यते। रुद्रटस्य मते वाक्ये षड्गुणाः सन्ति ।

**मन्दाक्रान्तावृत्तखण्डकाव्ये गुणविचारः -**

संस्कृतवाङ्मये बहवः कवयः परिदृश्यमानाः सन्ति। येषामनेकेषां गुणविषयिकी आलोचना विभिन्नेषु काव्यशास्त्रीयग्रन्थेषु अवलोकयामः। काव्यशास्त्रे विवेचना अत्यन्ता अपेक्षिता। परम्परारूपेण विविधाः मतावलम्बिनः आसन्- भामहः, दण्डी, वामनः, आनन्दवर्धनाचार्यः, राजशेखरः, कुन्तकः, भोजदेवः, क्षेमेन्द्रः, मम्मटः, वाग्भटः, हेमचन्द्रः, जयदेवः, विद्यानाथः, विश्वनाथः, जगन्नाथः प्रभृतयः। आधुनिककाव्ये गुणप्रयोगः अस्माभिः दृश्यते। यथा अस्माकं जगत्संसारः इव काव्यजगदपि गुणदोषैः परिपूर्णा। काव्यक्षेत्रेषु अपि व्यतिक्रमः लक्षणीयः। सहृदयानां आस्वादयोग्यकाव्यं गुणपरिपूर्णम्। मन्दाक्रान्तावृत्तखण्डकाव्ये माधुर्यमङ्गीगुणत्वेन लब्धम्। काव्ये बहुविधम् अप्रधानगुणत्वं स्वीकृतम् । शनैः शनैः काव्यं परिणतिं प्रति धावति। अस्मिन् काव्येऽपि अपराकाव्यालम्बिसम्भावाः दरीदृश्यन्ते। इदं काव्यं करुणपरिस्थितात् पूर्णं भवति। कविना करूणपत्नीवियोगवृत्तान्तं परिस्फुटम्। वियोगः सदा दुःखात्मकः। काव्ये अन्तिमे कविना पत्नीवियोगावलम्ब्य दुःखात्मककरुणपरिस्थितिः उपस्थाप्यते। करुणरसान्वितः दुःखात्मकश्लोकाः यथा-

**वर्षेष्वेवं किल कतिपयेष्वाप्तवत्सु प्रणाशं**
**राधादेहं समधिकृतवानामयो दुश्चिकित्स्यः।**
**नित्यं स्वल्पज्वरपरिभवो वासन्तेऽनुभूतः**
**कासः स्वल्पे वपुरपि परं कार्यमापत् क्रमेणा।।**
**दीर्घ कालं नियतमनया भोजनं नो गृहीतं**
**निद्रा नाप्ता निशि नरवपुः स्वास्थ्ययोग्यापि नूनम् ।**
**चिन्ता काचन्मिनसि सततं भाति सन्तापदात्री**
**नानाधातुक्षयकरसमापतिरेतन्निदानम् ।।**
**धर्मरेषा विमलचरिता श्रीतमन्त्रैर्गृहीता**
**जाता सर्वालयपरिजनप्रेमपात्री चिराय।**
**तामप्येनां परिहृतवती भाविनी का गतिर्मे**
**लोकातीतं विषमदूरितं दुर्गतिं सं विधत्ते ।।**
**साध्वी पत्युर्मिलनमधिकं मन्यते स्वर्गसङ्गात्**
**तद् विच्छेदं विषमनिरयं घोरदुःखानुविद्धम्।**

**राधा तस्मान्मम विरोहतो जीवने निर्व्यपेक्षा**

**दुःखाघातादशनशयने सञ्जातः तदवदग्यत् ।।**

**तस्मादेव ज्ञयसमुदयादेष दुःसाध्यरोगो**

**राधादेहे पदमकुरुतेत्याह वैद्यो१तिवियः ।**

**अस्या जातं रामयितुममुं संक्षयं सैव शक्त्या**

**रोगादस्मात् कथमपि भवेन्निष्कृतिर्नान्यथास्याः ।।**

**श्यामादासे सजलनयनं न्यस्य कल्पे शयानां**

**राधां पत्यागमनविधिना विस्मितां शीर्णकायाम्।**

**अश्वादीद् विकलवचनः सो१शय्यान्तलग्नो**

**राधे ! पापं सकरुणाहृदा स्वामिनं मां क्षमस्व ।।**

**श्रुत्वा घोरां समुदितदशां व्याकुलास्तद् गृहस्थाः**

**सर्वे हित्वा निजनिजकृतीरागस्तत्रशीघ्रम् ।**

**श्यामादासे विकलकरणो वैद्यसद्म प्रपेदे**

**राधा श्वासं चरममजहात् सर्वदुःखं सृजन्ती ।।** इति मया उत्थापिता पञ्चमविलासान्तर्गतश्लोकांशे सर्वत्र कवेः भूयांसि करुणवचांसि सन्ति। श्लोकेषु माधुर्यगुणान् धारयन्ति इति मम विचारः।

**उपसंहृतिः -**

एवमेव कालीपदतर्काचार्यमहाभागाः स्वकीयकर्मयजैः समग्रभारत-भूखण्डे देदीप्यन्ते। नद्यः यथा स्वकीयवेगेन प्रवहन्ति तथा कविरपि स्वकीयप्रतिभया काव्यरूपं पद्मं प्रस्फुटयति। कविवर्यस्य इदं काव्यं गुणसमन्वितम्। शब्दार्थयोः द्वयोः अलंकारयोः समन्वये काव्यम् इदम् अपूर्वचमत्कारित्वं लभ्यते। तस्य लेखन्या असाधारण-काव्यप्रतिभा दरीदृश्यते। तस्य काव्यशैलीप्रयोगे काव्यम् असाधारण-चमत्कारकारि शोभातिशायि अभवत्। विशेषणप्रयोगैः सर्वे राज्ञः आद्रियन्ते। माधुर्यगुणसम्पन्नं काव्यम् इदम्। सर्वान् गुणान् पर्यालोचनापूर्वकमाधुर्यगुणः सर्वोत्तमः इति वक्तुं शक्यते। माधुर्यगुणसर्वगुणपेक्षया उत्कृष्टः। एतादृशं माधुर्यगुणसम्पन्नकाव्यं सुललितं मनोग्राहि भवति इति शिवम्।

**परिशीलितग्रन्थाः-**


१)श्रीसुभाषितरत्नभाण्डागारम्-सम्पादकः श्री काशिनाथशर्मा, प्रकाशक-भारतीयविद्या संस्थान, वाराणसी-२२१००२, संस्करण-प्रथमः सन् २००१

२)नाट्यशास्त्रम्-पण्डितकेदारनाथसाहित्यभूषण-भारतीयविया प्रकाशन, नई दिल्ली, संस्करण-२००३

३)संस्कृतसाहित्यशास्त्रे गुणविवेचनम्-लेखक च प्रकाशक डा विश्वमूर्ति शास्त्री-अमर ग्रन्थ पाब्लिकेशन्स - विजयनगर, दिल्ली-२२००१, वर्ष-२००४

४)आचार्यदण्डिविरचित काव्यादर्श (द्वितीय परिच्छेद) प्रसादिनी (हिन्दी व्याख्या सहित) व्याख्याकार-पण्डित श्रीशिवनारायण शास्त्री संस्कृत विभाग, किरोडीमल महाविद्यालय दिल्ली विश्वविद्यालय, दिल्ली,परिमल पब्लिकेशन्स-दिल्ली, २२०००७, प्रकाशकः परिमल पब्लिकेशन्स १२००८५